पाक्षिक: संस्कृतप्रभातम्, भागवत एकादशी अश्विन: शु.११ रविवासरे युगाब्दे ५११६; दक्षिणायण, अंक: ७ वर्ष: १ दि– ५ आक्टोबर:२०१४

# संस्कृतप्रभातम्

## सम्पादकीयम्

साम्प्रतकाले बहव: जना: वयम् आध्यात्मिकजना: इति दर्शयितुम् इच्छन्ति किन्तु अध्यात्मं किं एतत् ते सम्यक न जानन्ति । बहव: धार्मिकोत्सवा: सन्ति् किन्तु एतेषु उत्सवेषु आध्यात्मिक: सन्देश: अतिदुर्लभ: । पुरुषा: स्त्रिय: च विविधानि वस्त्राणि अलङ्कारान् भूषणं कृत्वा चित्रपटसङ्गीते नृत्यन्ति विविधगुणदर्शनं कुर्वन्ति च । किन्तु एतस्य अध्यात्मे क: सम्बन्ध ? कोऽपि न ।

एतस्मिन् मासेऽपि वयं द्वे महोत्सवौ पश्याम: । विजयादशमी तथा नवरात्र । नवरात्रस्य अन्तिम दिन: विजयादशमी अर्थात् दसरा इति नाम्ना विख्यात:। एतयो: उत्सवयो: प्रयोजनं किम् इति, स्वल्पा: जना: जानन्ति ।

रावण: राक्षसनरेशा: आसीत् । स: शिवस्य उपासक: । या: उत्तमेषु नायकेषु आवश्यका: ता: सर्वे पात्रता: रावणे आसीत् । दुर्दैवेन् स: तस्य पात्रताम् अयोग्य: उपयोग: कृतवान् । शारिरीक बलेन तथा एतत् धनेन स: तस्य अधमस्वभावस्य बलि: अभवत् । कामान्धं भूत्वा अखिल सृष्टि तस्य उपभोगाय एव अस्ति एष भ्रम तस्मिन मनसि अभवत् । यदा जगन्मातासीताया: प्रति तस्य चेतसा भोगेच्छा उत्पन्ना अभवत् तदा एव स: स्वस्य विनाशस्य आरम्भं कृतवान् ।

वयं हनुमानस्य दास्यभावेन प्रेम, लक्ष्मणस्य बन्धुप्रेम , सीताया: पतिप्रेम जानामा: । एतत् प्रेम भगवते अस्ति किन्तु एतत् प्रेम यदा स्वइन्द्रियप्रित्यर्थं कामभावनायां परिवर्तते तदा अस्माकं दु:खस्य आरम्भं भविष्यति । यदी क: अपि भोगैश्वर्ये मज्जति तर्हि बहि आगन्तुम् न शक्नोति । रावण: भोगैश्वर्यजालेन् आवृत् अभवत् ।अत: एव तस्य का अपि इच्छा पूर्णा न अभवत् । भोगेन तृप्ति कदापि शक्यं नास्ति । प्रेममयीसेवेन तृप्ति भवति ।

यदा वयं अस्माकं स्वभाव: आध्यात्मिक: इति जानाम: तदा वयं अस्माकं प्रेम श्रीकृष्णाभिमुखं कर्तुम् शक्नुम: । एतत् आध्यात्मिक प्रेम एव सर्वत्र विजयी भविष्यते । एतत् प्रेम शाश्वतं ! एतत् प्रेम भगवद्धामे अपि अस्माकं सह आगमिष्यति ।

दुर्गा नवदिनानि युध्दं कृत्वा महिषासूरं हतवति । वयं स्वइन्द्रियप्रीत्यर्थं दान्डिया, गरबा, चित्रपटगीतानि, अपानपान इत्यादी अनेकानेकां दुष्टां हृदये स्थापयाम:। अस्माकं चेतनायाम् अपि कामक्रोधादि असुरा: सन्ति । अत: नवरात्रमहोत्सव: अर्थात् वयं एतेषाम असुरानां वधं करणीयं

यदि क: अपि रावणस्य अणूकरणं करोति तर्हि तस्य गति रावण इव भविष्यति । इति विजयादसमीमहोत्सवस्य सन्देश: । हृदयस्य अनर्थानां विनाशाय रामस्य शरणम् इव उपाय: ।

## सुभाषितम्

अश्व: शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च । पुरुषविशेषं प्राप्य
भवति योग्यायोग्याश्च॥

अनुवाद - अश्व:, शस्त्रम्, शास्त्रम्, सङ्गीतवाद्य, वाणी, स्त्री-पुरुष इत्यादिनां क: योजक: अस्ति, कथं नियोजति एतेन ते योग्य: वा अयोग्य: भवन्ति ॥

## प्रार्थना

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मे
अनवद्या ॥

अनुवाद -श्रीकृष्ण: विजयस्य अर्थात् अर्जुनस्य सखा। तस्य सचिदानन्दस्य देहस्य वर्ण: तमालवृक्ष: इव अस्ति । एतत् रूपं त्रिभुवनस्य जीवान् आकर्षते । तस्य पिताम्बरं सुर्यस्य किरणा: इव गौरं प्रतितम् । तस्य श्रीवदनं चन्दनस्य लेपेन अलङ्कृतम् । मम मनसि सर्वदा एतत् रुपम् एव तिष्ठतु ॥



## सम्भाषणम्

लतिका - चित्रक ! त्वं किं करोषि?
चित्रक: - अहं भगवद्गीतां पठामि । त्वं ....? ।
लतिका - अहम् अन्यत्र गच्छामि ।
चित्रक: - कुत्र गच्छसि ?
लतिका - विपणिं गच्छामि ।
चित्रक: - कदा ?
लतिका - इदानीम् एव ।
चित्रक: - किमर्थम् ?
लतिका - वस्तूनि आवश्यकानि। अत: गच्छामि ।
चित्रक: -वस्तूनि कुत: आनयसि ?
लतिका - विपण्यां गोविन्दा नाम्न: आपणत: आनयामि।
चित्रक: - मम अपि वस्तूनि आवश्यकानि । अहमपि आपनम् आगच्छामि । उपविशतु । पश्चात् गच्छाव ।
लतिका - तथैव भवतु।

प्रकाशनं मुद्रणं च संकेत- धीरशांत दास:, कनाई कृष्ण दास: पाक्षिक: संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८
अणुपत्रम् संकेत d16108@gmail.com, sanskritprabhatam@gmail.com. भ्रमणध्वनी-८८८८४४६६४८/९४२२३२४४३० 

# अम्बरीषस्य भक्तिः

राजा अम्बरीषः परमकृष्णभक्तः। सः एकदा प्रजाजनकल्याणार्थं कृष्णप्रीत्यर्थं च एकादशी उपवास कृतवान्। सः यदा पारणासमये व्रतपूर्त्यर्थं सिध्दम् अभवत् तदा तस्य गृहं मुनिः दुर्वासाः आगतवान्। अतिथिपूजां गृहीत्वा सः स्नानार्थं नदीं गतवान्। अम्बरीषस्य पारणासमयस्यः केवलः अर्धमुहूर्तः शेषः आसीत् तथापि दुर्वासाः नदीतः न प्रत्यागतवान्। अम्बरीषः चिन्तितवान् ‘‘ दुर्वासामुनिं विहाय भोजनं करोमि चेत् अतिथेः अपमानः भविष्यति। किन्तू एतस्य व्रतस्य शास्त्रोक्ता पूर्ती अपि आवश्यकी। अतः सः

तदा तस्य आमात्यान् एवम् उक्तवान् - ‘‘प्रभो! जलपानेन् व्रतपूर्ती भवति किन्तू जलपानं भोजनं न अतः अहं जलं पिबामि व्रतपूर्ती करोमि च॥ एषः उत्तमः सङ्ल्पः इति चिन्तयित्वा आमात्याः अपि अनुमोदनं दत्तवन्तः। अतः नृपः तथैव कृतवान्। तस्मिन् एव समये दुर्वासाः नदीतः प्रत्यागतवान्! राजा पारणां कृतवान् इति ज्ञात्वा सः कुपितः अभवत्। महारोषेण् एकां जटां उत्कृत्य सः असुरं उत्पन्नं कृतवान्। असुरः अम्बरीषे आक्रमणं कृतवान् किन्तू अम्बरीषः निर्भयः। किन्तु तत्र विष्णोः सुदर्शनचक्रम् आगतवान् असुरं ददाह च। अनन्तरं तत् दुर्वासोमुनिं हन्तुम् उद्युक्तम् अभवत्। भीतः मुनिः धावितवान्। चक्रं तं मुनिं सर्वत्र अनुगतवत्। मुनिः रक्षणार्थं ब्रह्मणः समीपं गतवान्। ब्रह्मा ‘‘ अस्मिन् विषये अहं न किमपि कर्तुं शक्नोमि’’ इति उक्तवान्। तदनन्तरम् मुनिः रक्षणार्थं शिवस्य समीपं गतवान्। ‘‘ एतत् विष्णोः चक्रम्। अतः अहं भवतः सहाय्यं कर्तुं न शक्नोमि’’ इति शिव उक्तवान्। अन्ते दुर्वासाः विष्णो समीपं गतवान्। विष्णु उक्तवान् - ‘‘भवान मम भक्तं हन्तुं प्रयत्नं कृतवान। एतत् सुदर्शनं भवन्तं हत्वा एव प्रत्यागमिष्यति। परन्तु एकः उपायः अस्ति। यदि अम्बरीषः भवन्तं क्षमन्तुम् इच्छति, तर्हि चक्रं भवतः नाशं न करिष्यति’’।



अम्बरीषस्य क्षमाप्रार्थनं नाम अपमानकरः विषयः। परन्तु अन्यः मार्गः न आसीत्। अतः दुर्वासाः अम्बरीषस्य प्रासादं गत्वा तस्य चरणौ पतितवान्। राजा परमवैष्णवः आसीत् अतः नम्रः। सः अपि मुनिम् आलिङ्ग्य तं नमस्कृतवान्। तदा सुदर्शनम् अपि विष्णोः समीपं प्रतिगतम्।

## ६पदरञ्जन्याः उत्तरम्

| | | | | | |
|---|---|---|---|---|---|
| १रा | म | को | २शा | त | ३की |
| ४त्रि | वा | र्षि | क | | ना |
| ५च | ण | क | म् | | श |
| र | | | | ६दि | |
| | ७य | दि | | ८प | ९रा |
| १०का | म | न | | ११ क | ति |

## पदरञ्जनी ७

| | | | | | |
|---|---|---|---|---|---|
| १ | | २ | | ३ | |
| | | ४ | ५ | | |
| | ६ | | | | ७ |
| ८ | | | | ९ | |
| १० | | | ११ | | |
| | | १२ | | | |

दिगंतसम शब्द -१. बुध्दीमान, विद्वान। ३. शुष्कः४. एषः वाद्यः शिवः वादयति। ६. सङ्घ, एकत्र। ८. आनन्देन कोलाहल, खेलति। ९. एकः उपसर्गः। १०. नष्ट, विनश्यति। ११. उद्यान, उपवन। १२. तडाग, सरोवर।

ऊर्ध्व शब्द - १. शान्तः, गम्भीरः। २. रामेन हता सा प्रथमा राक्षसि। ३. च्यवनस्य पौत्र, प्रमतेः पुत्र। ५. शिल्पी दानवः। ६. गृहम्, निवास स्थान। ७. सम्यकः कालः। ८. स्त्री, जिव्हा। ९. आशा रहीतः।

## विनोदः

घटं भिन्द्यात् पटं छिन्द्यात् कुर्यात् रासभरोहणं। येन केन प्रकारेण प्रग्धिदः पुरुषो भवेत्॥



## चिन्तनीयम्

**शुक**ः पञ्जरमध्यास्ते **काक**ः परुषनिस्वनः।
**लोक**ः प्रतिष्ठा जीवानां **श्लोक**ः पाठोऽक्षरच्युतः॥

